# shrIguhyanAmauchChiShTagaNeshAnasahasranAmAvaliH

# श्रीगुह्यनामौच्छिष्टगणेशानसहस्रनामावलिः

## Document Information

Text title : guhyanAma uchChiShTagaNeshasahasranAmAvalI

File name : guhyagaNeshasahasranAmAvalI.itx

Category : sahasranAmAvalI, ganesha

Location : doc_ganesha

Author : Traditional

Proofread by : krishna vallapareddy krishna321 at hotmail.com

Description-comments : Vighneshvara stutimanjari Vol 3, page 489, Ed. S.V.Radhakrishnashastri

Source : uDDAmaheshvaratantra

Latest update : December 1, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# श्रीगुह्यनामौच्छिष्टगणेशानसहस्रनामावलिः

॥ श्रीः ॥

ॐ श्रीगणेशाय नमः ।
(विशेषविधिस्तु) सर्वत्रादौ ॐ आं क्रों ह्रीं क्लीं ह्रीं ग्लौं
गं इति अष्टतारीसंयोजनम् महागणेशानोपासकैः ॐ श्रीं ह्रीं क्लीं
ग्लौं गं इति षट्तारीसंयोजनं सप्तत्रिंशदक्षर श्रीमदुच्छिष्टगणेशानोपासकैः
ॐ आं क्रों ह्रीं गं ग्लौं इति षट्तारीसंयोजनं च कर्तव्यम् ।
सर्वत्र नमोन्तप्रतिनामान्तप्रणवपल्लवितत्वमपि ॥ )

Use the prefix of eight bIjamantras ॐ आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं
if you are a follower of Mahaganesha.
Use the prefix of six bIjamantras ॐ श्रीं ह्रीं क्लीं ग्लौं गं
or ॐ आं क्रों ह्रीं गं ग्लौं
if you are a follower of Uchchishtaganapati. namaH follows for all names.
(For any general devotee, use only OM as given below.)

ॐ महागणाधिनाथाख्याय नमः ।
ॐ अष्टाविंशत्यक्षरात्मकाय नमः ।
ॐ तारश्रीशक्तिकन्दर्पभूस्मृतिबिन्दुसंयुताय नमः ।
ॐ ङेन्तगणपतिप्रोक्ताय नमः ।
ॐ वरवरदसंयुताय नमः ।
ॐ सर्वजनद्वितीयान्ताय नमः ।
ॐ आदित्यशिवसंयुताय नमः ।
ॐ वशमानयसंयुक्ताय नमः ।
ॐ वह्निजायासमर्पिताय नमः ।
ॐ गणकमुनिसन्दृष्टाय नमः । १०
ॐ निचृद्गायत्रभाषिताय नमः ।
ॐ सुरादिवन्द्यपादाब्जाय नमः ।

ॐ मनुराजविजृम्भिताय नमः ।
ॐ इक्षुसागरमध्यस्थाय नमः ।
ॐ रत्नद्वीपस्य मध्यगाय नमः ।
ॐ तरङ्गमालिकाधौतशीततरामलालयाय नमः ।
ॐ कल्पपादपसंशोभिमणिभूमिविराजिताय नमः ।
ॐ मृदुवातसमानीतदिव्यगन्धनिषेविताय नमः ।
ॐ नानाकुसुमसङ्कीर्णाय नमः ।
ॐ पक्षिवृन्दरवप्रियाय नमः । २०
ॐ युगपदृतुषटकेन संसेवितपदद्वयाय नमः ।
ॐ नवरत्नसमाविद्धसिंहासनसमास्थिताय नमः ।
ॐ जपापुष्पतिरस्कारिरक्तकान्तिसमुज्ज्वलाय नमः ।
ॐ वल्लभाश्लिष्टवामाङ्गाय नमः ।
ॐ एकादशकरान्विताय नमः ।
ॐ रत्नकुम्भाढ्यशुण्डाग्राय नमः ।
ॐ बीजापूरिणे नमः ।
ॐ गदाधराय नमः ।
ॐ इक्षुचापधराय नमः ।
ॐ शूलिने नमः । ३०
ॐ चक्रपाणये नमः ।
ॐ सरोजभृते नमः ।
ॐ पाशिने नमः ।
ॐ धृतोत्पलाय नमः ।
ॐ शालीमञ्जरीभृते नमः ।
ॐ स्वदन्तभृते नमः ।
ॐ पञ्चावरणचक्रेशाय नमः ।
ॐ षडाम्नायप्रपूजिताय नमः ।
ॐ मूलमन्त्राढ्यपूजाकाय नमः ।
ॐ षडङ्गपरिवारिताय नमः । ४०
ॐ परौघपूजनातुष्टाय नमः ।
ॐ दिव्यौघादिनिषेविताय नमः ।
ॐ श्रीश्रीपतिसन्तुष्टाय नमः ।
ॐ गिरिजातत्पतिप्रियाय नमः ।

ॐ रतिमन्मथसम्प्रीताय नमः ।
ॐ महीवराहपूजिताय नमः ।
ॐ ऋध्यामोदप्रपूजाकाय नमः ।
ॐ समृद्धितत्पतिप्रियाय नमः ।
ॐ कान्तिसुमुखसुप्रीताय नमः ।
ॐ मदनावतिकदुर्मुखाय नमः । ५०
ॐ मदद्रवाविघ्नपूज्याय नमः ।
ॐ द्राविणीविघ्नेकर्तृकाय नमः ।
ॐ वसुधाराशङ्खपूज्याय नमः ।
ॐ वसुमतिकपद्मकाय नमः ।
ॐ ब्राह्मीप्रियाय नमः ।
ॐ ईश्वरीशाय नमः ।
ॐ कौमारीसेविताङ्घ्रिकाय नमः ।
ॐ वैष्णव्यर्च्चितपद्वन्द्वाय नमः ।
ॐ वाराहीसेविताङ्घ्रिकाय नमः ।
ॐ इद्राणीपूजितश्रीकाय नमः । ६०
ॐ चामुण्डाश्रितपादुकाय नमः ।
ॐ महालक्ष्मीमहामातृसम्पूजितपदद्वयाय नमः ।
ॐ ऐरावतसमारूढवज्रहस्तेन्द्रपूजिताय नमः ।
ॐ अजोपरिसमारूढशक्तिहस्ताग्निसेविताय नमः ।
ॐ महिषारूढदण्डाढ्ययमदेवप्रपूजिताय नमः ।
ॐ नरारोहिखङ्गहस्तनिर्रृत्याश्रितपादुकाय नमः ।
ॐ मकरवाहनारूढपाशाढ्यवरुणार्च्चिताय नमः ।
ॐ रुरोरुपरिसन्तिष्ठध्वजाढ्यश्वसनार्च्चिताय नमः ।
ॐ अश्ववाहनशङ्खाढ्यसोमदेवप्रपूजिताय नमः ।
ॐ वृषभवाहनारूढत्रिशूलाढ्येशसेविताय नमः । ७०
ॐ पञ्चावरणपूजोद्यत्कारुण्याकुलमानसाय नमः ।
ॐ पञ्चावृतिनमस्याकभक्तवाञ्छाप्रपूरणाय नमः ।
ॐ एकमूर्तये नमः ।
ॐ अष्टमूर्तये नमः ।
ॐ पञ्चाशन्मूर्तिभेदकाय नमः ।
ॐ ब्रह्मचारिसमाख्याकाय नमः ।

ॐ पत्नीसंयुतमूर्तिकाय नमः ।
ॐ नग्नपत्नीसमाश्लिष्टाय नमः ।
ॐ सुरतानन्दतुन्दिलाय नमः ।
ॐ सुमबाणेक्षुकोदण्डपाशाङ्कुशवरायुधाय नमः । ८०
ॐ कामिनीचुम्बनायुक्तसदालिङ्गनतत्पराय नमः ।
ॐ अण्डकर्णकपोलाख्यत्रिस्थानमदवारिराजे नमः ।
ॐ मदापोलुब्धमधुपैर्विचुम्बितकपोलकाय नमः ।
ॐ कामुकाय नमः ।
ॐ कामिनीकान्ताय नमः ।
ॐ कान्ताधरमधुव्रताय नमः ।
ॐ कामिनीहृदयाकर्षिणे नमः ।
ॐ वशागणनिषेविताय नमः ।
ॐ ऐरावतादिदिङ्नागमिथुनाष्टकपूजिताय नमः ।
ॐ सदा जायाश्रिताय नमः । ९०
ॐ अश्रान्ताय नमः ।
ॐ नग्नोपासकपूजिताय नमः ।
ॐ मांसाशिने नमः ।
ॐ वारुणीमत्ताय नमः ।
ॐ मत्स्यभुजे नमः ।
ॐ मैथुनप्रियाय नमः ।
ॐ मुद्रासप्तकसम्प्रीताय नमः ।
ॐ मपञ्चकनिषेविताय नमः ।
ॐ पञ्चाङ्गरागसुप्रीताय नमः ।
ॐ शृङ्गाररसलम्पटाय नमः । १००
ॐ कर्पूरवीटीसौगन्ध्यकल्लोलितककुप्तटाय नमः ।
ॐ उपासकवरिष्ठास्यवीट्यामौक्यनिरासकाय नमः ।
ॐ योन्याहितसुशुण्डाकाय नमः ।
ॐ योनिलालनलालसाय नमः ।
ॐ भगामोदसमाश्वासिने नमः ।
ॐ भगचुम्बनलम्पटाय नमः ।
ॐ कान्ताकुचसमालिङ्गिशुण्डामण्डितविग्रहाय नमः ।
ॐ उच्छिष्टाख्यगणेशानाय नमः ।

ॐ उच्छिष्टास्वादिसिद्धिदाय नमः ।
ॐ उच्छिष्टपूजनरताय नमः । ११०
ॐ उच्छिष्टजपसिद्धिदाय नमः ।
ॐ उच्छिष्टहोमसम्प्रीताय नमः ।
ॐ उच्छिष्टव्रतधारकाय नमः ।
ॐ उच्छिष्टतर्पणप्रीताय नमः ।
ॐ उच्छिष्टमार्जने रताय नमः ।
ॐ उच्छिष्टब्राह्मणकुलसन्तर्पणसुसाधिताय नमः ।
ॐ उच्छिष्टविघ्नराजेन्द्राय नमः ।
ॐ उच्छिष्टवस्तुपूजिताय नमः ।
ॐ उच्छिष्टमन्त्रसञ्जापिसर्वसिद्धिप्रकाशकाय नमः ।
ॐ उच्छिष्टोपचाररताय नमः । १२०
ॐ उच्छिष्टोपास्तिसिद्धिदाय नमः ।
ॐ मदिरानन्दसन्तोषिणे नमः ।
ॐ सदामत्ताय नमः ।
ॐ मदोद्धताय नमः ।
ॐ मधुराशिने नमः ।
ॐ मधूद्रिक्ताय नमः ।
ॐ मधुपानपरायणाय नमः ।
ॐ मधुस्नानपरामोदाय नमः ।
ॐ माधुर्यैकरसाश्रयाय नमः ।
ॐ मदिरासिन्धुसम्भूताय नमः । १३०
ॐ सुधामज्जनतत्पराय नमः ।
ॐ मदिराम्बुधिसंस्थायिने नमः ।
ॐ मदिरामज्जने रताय नमः ।
ॐ मदिरातर्पणप्रीताय नमः ।
ॐ मदिरामार्जनादृताय नमः ।
ॐ मदिरामोदसन्तोषिणे नमः ।
ॐ मदिरामोदलोलुपाय नमः ।
ॐ कादम्बरीरसोन्मत्ताय नमः ।
ॐ कादम्बरीप्रियाश्रिताय नमः ।
ॐ द्राक्षारससमाह्लादिने नमः । १४०

ॐ द्राक्षारसमदोल्वणाय नमः ।
ॐ वारुणीमदघूर्णाम्बाय नमः ।
ॐ वारुणीमदविह्वलाय नमः ।
ॐ नारिकेलरसास्वादिने नमः ।
ॐ नारिकेलमधुप्रियाय नमः ।
ॐ तालफलरसोन्मत्ताय नमः ।
ॐ तालमद्यपरायणाय नमः ।
ॐ पानसमद्यसुप्रीताय नमः ।
ॐ कदलीमद्यपानकाय नमः ।
ॐ दाडिमीरससम्प्रीताय नमः । १५०
ॐ गौडपानकलम्पटाय नमः ।
ॐ पौष्पीपानसदामत्ताय नमः ।
ॐ पौष्पीकरण्डमण्डिताय नमः ।
ॐ युवतीसुरतासक्ताय नमः ।
ॐ युवतीमणिते रताय नमः ।
ॐ मोदप्रमोदकृत्सङ्गाय नमः ।
ॐ भैरवानन्दवत्सलाय नमः ।
ॐ शुक्लसेव्याय नमः ।
ॐ शुक्लतुष्टाय नमः ।
ॐ शुक्लसिद्धिवरप्रदाय नमः । १६०
ॐ शुक्लधातुमहःपूज्याय नमः ।
ॐ ओजश्शक्तिप्रकाशनाय नमः ।
ॐ शुक्रादिमान्त्रिकैर्धुर्यैरर्धरात्रप्रपूजिताय नमः ।
ॐ मुक्तकच्छाय नमः ।
ॐ मुक्तकेशाय नमः ।
ॐ नग्नकान्तासमाश्रिताय नमः ।
ॐ ताम्बूलचर्वणायुक्ताय नमः ।
ॐ कर्पूरवीटिकामदाय नमः ।
ॐ कान्ताचर्वितताम्बूलरसास्वादनलम्पटाय नमः ।
ॐ विशेषतः कलियुगेसिद्धिदाय सुरपादपाय नमः । १७०
ॐ महापद्मादिखर्वान्तनिधिपौष्कल्यपोषकाय नमः ।
ॐ स्वल्पायाससुसम्प्रीताय नमः ।

ॐ कलौ तूर्णफलप्रदाय नमः ।
ॐ पितृकाननसंस्थायिने नमः ।
ॐ पितृकाननसिद्धिदाय नमः ।
ॐ माचीपत्रसमाराध्याय नमः ।
ॐ बृहतीपत्रतोषिताय नमः ।
ॐ दूर्वायुग्मनमस्याकाय नमः ।
ॐ धुत्तूरदलपूजिताय नमः ।
ॐ विष्णुक्रान्तसपर्याकाय नमः । १८०
ॐ गण्डलीपत्रसेविताय नमः ।
ॐ अर्कपत्रसुसंराध्याय नमः ।
ॐ अर्जुनपत्रकपूजिताय नमः ।
ॐ नानापत्रसुसम्प्रीताय नमः ।
ॐ नानापुष्पसुसेविताय नमः ।
ॐ सहस्राार्चनपूजायांसहस्रकमलप्रियाय नमः ।
ॐ पुन्नागपुष्पसम्प्रीताय नमः ।
ॐ मन्दारकुसुमप्रियाय नमः ।
ॐ बकुलपुष्पसन्तुष्टाय नमः ।
ॐ धुत्तूरसुमशेखराय नमः । १९०
ॐ रसालपुष्पसंशोभिने नमः ।
ॐ केतकीपुष्पसुप्रियाय नमः ।
ॐ पारिजातप्रसूनाढ्याय नमः ।
ॐ माधवीकुन्दतोषिताय नमः ।
ॐ शम्यालङ्कारसुप्रीताय नमः ।
ॐ मृणालपाटलीप्रियाय नमः ।
ॐ लक्षपङ्कजपूजायामणिमादिप्रसाधकाय नमः ।
ॐ संहितापदपाठादिघनान्तज्ञानदायकाय नमः ।
ॐ अष्टावधानसन्धायिने नमः ।
ॐ शतावधानपोषकाय नमः । २००
ॐ साहस्रिकावधानश्रीपरिपाटीप्रवर्धनाय नमः ।
ॐ मनश्चिन्तितविज्ञात्रे नमः ।
ॐ मनसा चिन्तितप्रदाय नमः ।
ॐ भक्तत्राणव्यग्रचित्ताय नमः ।

ॐ स्मृतिमात्राभयप्रदाय नमः ।
ॐ स्मृतिमात्राखिलत्रात्रे नमः ।
ॐ साधकेष्टदतल्लजाय नमः ।
ॐ स्वसाधकविपक्षच्छिदे नमः ।
ॐ विपक्षजनभक्षकाय नमः ।
ॐ व्याधिहन्त्रे नमः । २१०
ॐ व्यथाहन्त्रे नमः ।
ॐ महाव्याधिविनाशनाय नमः ।
ॐ पैत्तिकार्तिप्रशमनाय नमः ।
ॐ श्लैष्मिकस्य विनाशकाय नमः ।
ॐ वातिकज्वरविध्वंसिने नमः ।
ॐ शूलगुल्मादिनाशनाय नमः ।
ॐ नेत्ररोगप्रशमनाय नमः ।
ॐ नित्यज्वरविनाशनाय नमः ।
ॐ कासादिव्याधिसंहर्त्रे नमः ।
ॐ सर्वज्वरविनाशनाय नमः । २२०
ॐ आधिहन्त्रे नमः ।
ॐ तमोहन्त्रे नमः ।
ॐ सर्वापद्विनिवारकाय नमः ।
ॐ धनदायिने नमः ।
ॐ यशोदायिने नमः ।
ॐ ज्ञानदायिने नमः ।
ॐ सुरद्रुमाय नमः ।
ॐ कल्पत्वदायकाय नमः ।
ॐ चिन्तामणये नमः ।
ॐ आयुष्यदायकाय नमः । २३०
ॐ परकायप्रवेशादियोगसिद्धिविधायकाय नमः ।
ॐ महाधनित्वसन्धात्रे नमः ।
ॐ धराधीशत्वदायकाय नमः ।
ॐ तापत्रयाग्निसन्तप्तसमाह्लादनकौमुद्यै नमः ।
ॐ जन्मव्याधिजरामृत्युमहाव्याधिविनाशकाय नमः ।
ॐ संसारकाननच्छेत्रे नमः ।

ॐ ब्रह्मविद्याप्रकाशकाय नमः ।
ॐ संसारभयविध्वंसिपराकामकलावपुषे नमः ।
ॐ उच्छिष्टाख्यगणाधीशाय नमः ।
ॐ वामाचरणपूजिताय नमः । २४०
ॐ नवाक्षरीमन्त्रराजाय नमः ।
ॐ दशवर्णकमन्त्रराजे नमः ।
ॐ एकादशाक्षरीरूपाय नमः ।
ॐ सप्तविंशतिवर्णकाय नमः ।
ॐ षड्विंशदर्णसम्पूज्याय नमः ।
ॐ बलिमन्त्रप्रपूजिताय नमः ।
ॐ द्वादशाक्षरसन्निष्ठाय नमः ।
ॐ एकोनविंशतीष्टदाय नमः ।
ॐ सप्तवर्णाधिकत्रिंशदर्णमन्त्रस्वरूपकाय नमः ।
ॐ द्वात्रिंशदक्षरारूढाय नमः । २५०
ॐ दक्षिणाचारसेविताय नमः ।
ॐ पञ्चावृतिकयन्त्रोद्धवरिवस्याविधिप्रियाय नमः ।
ॐ नववर्णादिमन्त्रौघसम्प्रपूजितपादुकाय नमः ।
ॐ परौघीयगुरुव्यूहसन्तर्पणसुसाधिताय नमः ।
ॐ महत्पदसमायुक्तपादुकापूजनप्रियाय नमः ।
ॐ दक्षिणाभिमुखेशस्यपूजनेन वरप्रदाय नमः ।
ॐ दिव्यवृन्दसिद्धवृन्दमानवौघनिषेविताय नमः ।
ॐ त्रिवारं मूलमन्त्रेणबिन्दुचक्रे सुतर्पिताय नमः ।
ॐ षडङ्गदेवतापूज्याय नमः ।
ॐ षण्मुखाम्नायराजिताय नमः । २६०
ॐ तुषारसमशोभाकहृदयाम्बानमस्कृताय नमः ।
ॐ स्फटिकाश्मसमानश्रीशिरोदेवीनिषेविताय नमः ।
ॐ श्यामशोभासमुज्जृम्भिशिखादेवीप्रपूजिताय नमः ।
ॐ इन्द्रनीलमणिच्छायकवचाम्बापरीवृताय नमः ।
ॐ कृष्णवर्णसुशोभिश्रीनेत्रमातृसमावृताय नमः ।
ॐ आरुण्यौघनदीमज्जदस्त्राम्बासेविताङ्घ्रिकाय नमः ।
ॐ वसुदलाब्जमूलेषुशक्त्यष्टकसमन्विताय नमः ।
ॐ विद्यापूज्याय नमः ।

ॐ विश्वधात्रीभोगदार्चितपादुकाय नमः ।
ॐ विघ्ननाशिकया पूज्याय नमः । २७०
ॐ निधिप्रदापरीवृताय नमः ।
ॐ पापघ्निकापूज्यपादाय नमः ।
ॐ पुण्यादेवीनिषेविताय नमः ।
ॐ अन्वर्थनामसंराजिशशिप्रभाप्रपूजिताय नमः ।
ॐ दलाष्टकस्य मध्येषुसिद्ध्यष्टकपरीवृताय नमः ।
ॐ अणिम्नीपूजितपदाय नमः ।
ॐ महिम्न्यर्चितपादुकाय नमः ।
ॐ लघिम्नीचिन्तितपदाय नमः ।
ॐ गरिम्णीपूजिताङ्घ्रिकाय नमः ।
ॐ ईशित्वार्चितदेवेन्द्राय नमः । २८०
ॐ वशित्वार्चितवैभवाय नमः ।
ॐ प्राकाम्यदेवीसम्प्रीताय नमः ।
ॐ प्राप्तिसिद्धिप्रपूजिताय नमः ।
ॐ बाह्याष्टदलराजीवेवक्रतुण्डादिरूपकाय नमः ।
ॐ वक्रतुण्डाय नमः ।
ॐ एकदंष्ट्राय नमः ।
ॐ महोदराय नमः ।
ॐ गजाननाय नमः ।
ॐ लम्बोदराख्याय नमः ।
ॐ विकटाय नमः । २९०
ॐ विघ्नराजे नमः ।
ॐ धूम्रवर्णकाय नमः ।
ॐ बहिरष्टदलाग्रेषुब्राह्म्यादिमातृसेविताय नमः ।
ॐ मृगचर्मावृतस्वर्णकान्तिब्राह्मीसमावृताय नमः ।
ॐ नृकपालादिसम्बिभ्रच्चन्द्रगौरमहेशिकाय नमः ।
ॐ इन्द्रगोपारुणच्छायकौमारीवन्द्यपादुकाय नमः ।
ॐ नीलमेघसमच्छायवैष्णवीसुपरिष्कृताय नमः ।
ॐ अञ्जनाद्रिसमानश्रीवाराहीपर्यलङ्कृताय नमः ।
ॐ इन्द्रनीलप्रभापुञ्जलसदिन्द्राणिकायुताय नमः ।
ॐ शोणवर्णसमुल्लासिचामुण्डार्चितपादुकाय नमः । ३००

ॐ स्वर्णकान्तितिरस्कारिमहालक्ष्मीनिषेविताय नमः ।
ॐ ऐरावतादिवज्रादिदेवेन्द्रादिप्रपूजिताय नमः ।
ॐ पञ्चावृतिनमस्यायामणिमादिप्रकाशकाय नमः ।
ॐ सङ्गुप्तविद्याय नमः ।
ॐ सङ्गुप्तवरिवस्याविधिप्रियाय नमः ।
ॐ वामाचरणसुप्रीताय नमः ।
ॐ क्षिप्रसन्तुष्टमानसाय नमः ।
ॐ कोङ्काचलशिरोवर्तिने नमः ।
ॐ कोङ्काचलजनप्रियाय नमः ।
ॐ कोङ्काम्बुदजलास्वादिने नमः । ३१०
ॐ कावेरीतीरवासकाय नमः ।
ॐ जाह्नवीमज्जनासक्ताय नमः ।
ॐ कालिन्दीमज्जने रताय नमः ।
ॐ शोणभद्राजलोद्भूताय नमः ।
ॐ शोणपाषाणरूपकाय नमः ।
ॐ सरय्वापःप्रवाहस्थाय नमः ।
ॐ नर्मदावारिवासकाय नमः ।
ॐ कौशिकीजलसंवासाय नमः ।
ॐ चन्द्रभागाम्बुनिष्ठिताय नमः ।
ॐ ताम्रपर्णीतटस्थायिने नमः । ३२०
ॐ महासारस्वतप्रदाय नमः ।
ॐ महानदीतटावासाय नमः ।
ॐ ब्रह्मपुत्राम्बुवासकाय नमः ।
ॐ तमसातम आकाराय नमः ।
ॐ महातमोपहारकाय नमः ।
ॐ क्षीरापगातीरवासिने नमः ।
ॐ क्षीरनीरप्रवर्धकाय नमः ।
ॐ कामकोटीपीठवासिने नमः ।
ॐ शङ्करार्चितपादुकाय नमः ।
ॐ ऋश्यशृङ्गपुरस्थायिने नमः । ३३०
ॐ सुरेशार्चितवैभवाय नमः ।
ॐ द्वारकापीठसंवासिने नमः ।

ॐ पद्मपादार्चिताङ्घ्रिकाय नमः ।
ॐ जगन्नाथपुरस्थायिने नमः ।
ॐ तोटकाचार्यसेविताय नमः ।
ॐ ज्योतिर्मठालयस्थायिने नमः ।
ॐ हस्तामलकपूजिताय नमः ।
ॐ विद्याभोगयशोमोक्षयोगलिङ्गप्रतिष्ठिताय नमः ।
ॐ पञ्चलिङ्गप्रतिष्ठायिने नमः ।
ॐ द्वादशलिङ्गसंस्थिताय नमः । ३४०
ॐ कोलाचलपुरस्थायिने नमः ।
ॐ कामेशीनगरेश्वराय नमः ।
ॐ ज्वालामुखीमुखस्थायिने नमः ।
ॐ श्रीशैलकृतवासकाय नमः ।
ॐ लङ्केश्वराय नमः ।
ॐ कुमारीशाय नमः ।
ॐ काशीशाय नमः ।
ॐ मथुरेश्वराय नमः ।
ॐ मलयाद्रिशिरोवासिने नमः ।
ॐ मलयानिलसेविताय नमः । ३५०
ॐ शोणाद्रिशिखरारूढाय नमः ।
ॐ शोणाद्रीशप्रियङ्कराय नमः ।
ॐ जम्बूवनान्तमध्यस्थाय नमः ।
ॐ वल्मीकपुरमध्यगाय नमः ।
ॐ पञ्चाशत्पीठनिलयाय नमः ।
ॐ पञ्चाशदक्षरात्मकाय नमः ।
ॐ अष्टोत्तरशतक्षेत्राय नमः ।
ॐ अष्टोत्तरशतपूजिताय नमः ।
ॐ रत्नशैलकृतावासाय नमः ।
ॐ शुद्धज्ञानप्रदायकाय नमः । ३६०
ॐ शातकुम्भगिरिस्थायिने नमः ।
ॐ शातकुम्भोदरस्थिताय नमः ।
ॐ गोमयप्रतिमाविष्टाय नमः ।
ॐ श्वेतार्कतनुपूजिताय नमः ।

ॐ हरिद्राबिम्बसुप्रीताय नमः ।
ॐ निम्बबिम्बसुपूजिताय नमः ।
ॐ अश्वत्थमूलसंस्थायिने नमः ।
ॐ वटवृक्षाधरस्थिताय नमः ।
ॐ निम्बवृक्षस्य मूलस्थाय नमः ।
ॐ प्रतिग्रामाधिदैवताय नमः । ३७०
ॐ अश्वत्थनिम्बसंयोगेप्रियालिङ्गितमूर्तिकाय नमः ।
ॐ गम्बीजरूपाय नमः ।
ॐ एकार्णाय नमः ।
ॐ गणाध्यक्षाय नमः ।
ॐ गणाधिपाय नमः ।
ॐ ग्लैम्बीजाख्याय नमः ।
ॐ गणेशानाय नमः ।
ॐ गोङ्काराय नमः ।
ॐ एकवर्णकाय नमः ।
ॐ विरिरूपाय नमः । ३८०
ॐ विघ्नहन्त्रे नमः ।
ॐ दृष्टादृष्टफलप्रदाय नमः ।
ॐ पत्नीवराङ्गसत्पाणये नमः ।
ॐ सिन्दूराभाय नमः ।
ॐ कपालभृते नमः ।
ॐ लक्ष्मीगणेशाय नमः ।
ॐ हेमाभाय नमः ।
ॐ एकोनत्रिंशदक्षराय नमः ।
ॐ वामाङ्गाविष्टलक्ष्मीकाय नमः ।
ॐ महाश्रीप्रविधायकाय नमः । ३९०
ॐ त्र्यक्षराय नमः ।
ॐ शक्तिगणपाय नमः ।
ॐ सर्वसिद्धिप्रपूरकाय नमः ।
ॐ चतुरक्षरशक्तीशाय नमः ।
ॐ हेमच्छायाय नमः ।
ॐ त्रिणेत्रकाय नमः ।

ॐ क्षिप्रप्रसादपङ्क्तिवर्णाय नमः ।
ॐ रक्ताभाय नमः ।
ॐ कल्पवल्लिभृते नमः ।
ॐ पञ्चवक्त्राय नमः । ४००
ॐ सिंहवाहाय नमः ।
ॐ हेरम्बाय नमः ।
ॐ चतुरर्णकाय नमः ।
ॐ सुब्रह्मण्यगणेशानाय नमः ।
ॐ धात्वर्णाय नमः ।
ॐ सर्वकामदाय नमः ।
ॐ अरुणाभतनुश्रीकाय नमः ।
ॐ कुक्कुटोद्यत्करान्विताय नमः ।
ॐ अष्टाविंशतिवर्णात्ममन्त्रराजसुपूजिताय नमः ।
ॐ गन्धर्वसिद्धसंसेव्याय नमः । ४१०
ॐ व्याघ्रद्विपादिभीकराय नमः ।
ॐ मन्त्रशास्त्रमहोदन्वत्समुद्यतकलानिधये नमः ।
ॐ जनसम्बाधसम्मोहिने नमः ।
ॐ नवद्रव्यविशेषकाय नमः ।
ॐ कामनाभेदसंसिद्धविविधध्यानभेदकाय नमः ।
ॐ चतुरावृत्तिसन्तृप्तिप्रीताय नमः ।
ॐ अभीष्टसमर्पकाय नमः ।
ॐ चन्द्रचन्दनकाश्मीरकस्तूरीजलतर्पिताय नमः ।
ॐ शुण्डाग्रजलसन्तृप्तिकैवल्यफलदायकाय नमः ।
ॐ शिरःकृतपयस्तृप्तिसर्वसम्पद्विधायकाय नमः । ४२०
ॐ गुह्यदेशमधुद्रव्यसन्तृप्त्याकामदायकाय नमः ।
ॐ नेत्रद्वयमधुद्रव्यतृप्त्याकृष्टिविधायकाय नमः ।
ॐ पृष्ठदेशघृतद्रव्यतृप्तिभूपवशङ्कराय नमः ।
ॐ एरण्डतैलसन्तृप्तिरण्डाकर्षकनाभिकाय नमः ।
ॐ ऊरुयुग्मकतैलीयतर्पणातिप्रमोदिताय नमः ।
ॐ प्रीतिप्रवर्धकांसीयपयःपयःप्रतर्पणाय नमः ।
ॐ धर्मवर्धकतुण्डीयद्रव्यत्रयसुतर्पणाय नमः ।
ॐ अष्टद्रव्याहुतिप्रीताय नमः ।

ॐ विविधद्रव्यहोमकाय नमः ।
ॐ ब्राह्ममुहूर्तनिष्पन्नहोमकर्मप्रसादिताय नमः । ४३०
ॐ मधुद्रव्यकहोमेनस्वर्णसमृद्धिवर्धकाय नमः ।
ॐ गोदुग्धकृतहोमेनगोसमृद्धिविधायकाय नमः ।
ॐ आज्याहुतिकहोमेनलक्ष्मीलासविलासकाय नमः ।
ॐ शर्कराहुतिहोमेनकाष्ठाष्टकयशःप्रदाय नमः ।
ॐ दधिद्रव्यकहोमेनसर्वसम्पत्तिदायकाय नमः ।
ॐ शाल्यन्नकृतहोमेनान्नसमृद्धिवितारकाय नमः ।
ॐ सतण्डुलतिलाहुत्याद्रव्यकदम्बपूरकाय नमः ।
ॐ लाजाहुतिकहोमेनदिगन्तव्यापिकीर्तिदाय नमः ।
ॐ जातीप्रसूनहोमेनमेधाप्रज्ञाप्रकाशकाय नमः ।
ॐ दूर्वात्रिकीयहोमेनपूर्णायुःप्रतिपादकाय नमः । ४४०
ॐ सुपीतसुमहोमेनवैरिभूपतिशिक्षकाय नमः ।
ॐ विभीतकसमिद्धोमैःस्तम्भनोच्चाटसिद्धिदाय नमः ।
ॐ अपामार्गसमिद्धोमैःपण्ययोषावशङ्कराय नमः ।
ॐ एरण्डकसमिद्धोमैःरण्डासङ्घवशङ्कराय नमः ।
ॐ निम्बद्रुदलहोमेनविद्वेषणविधायकाय नमः ।
ॐ धृताक्तदौग्धशाल्यन्नहोमैरिष्टफलप्रदाय नमः ।
ॐ तिलादिचतुराहुत्यासर्वप्राणिवशङ्कराय नमः ।
ॐ नानाद्रव्यसमिद्धोमैराकर्षणादिसिद्धिदाय नमः ।
ॐ त्रैलोक्यमोहनाय नमः ।
ॐ विघ्नाय नमः । ४५०
ॐ त्र्यधिकत्रिंशदर्णकाय नमः ।
ॐ द्वादशाक्षरशक्तीशाय नमः ।
ॐ पत्नीवराङ्गहस्तकाय नमः ।
ॐ मुक्ताचन्द्रौघदीप्ताभाय नमः ।
ॐ विरिविघ्नेशपद्धतये नमः ।
ॐ एकादशाक्षरीमन्त्रोल्लासिने नमः ।
ॐ भोगगणाधिपाय नमः ।
ॐ द्वात्रिंशदर्णसंयुक्ताय नमः ।
ॐ हरिद्रागणपाय नमः ।
ॐ महते नमः । ४६०

ॐ जगत्त्रयहिताय नमः ।
ॐ भोगमोक्षदाय नमः ।
ॐ कविताकराय नमः ।
ॐ षडर्णाय नमः ।
ॐ पापविध्वंसिने नमः ।
ॐ सर्वसौभाग्यदायकाय नमः ।
ॐ वक्रतुण्डाभिधाय नमः ।
ॐ श्रीमते नमः ।
ॐ भजतां कामदाय मणये नमः ।
ॐ मेघोल्कादिमहामन्त्राय नमः । ४७०
ॐ सर्ववश्यफलप्रदाय नमः ।
ॐ आथर्वणिकमन्त्रात्मने नमः ।
ॐ रायस्पोषादिमन्त्रराजे नमः ।
ॐ वक्रतुण्डेशगायत्रीप्रतिपादितवैभवाय नमः ।
ॐ पिण्डमन्त्रादिमालान्तसर्वमन्त्रौघविग्रहाय नमः ।
ॐ सञ्ज्ञप्तिहोमसन्तृप्तिसेकभोजनसाधिताय नमः ।
ॐ पञ्चाङ्गकपुरश्चर्याय नमः ।
ॐ अर्णलक्षजपसाधिताय नमः ।
ॐ कोट्यावृत्तिकसञ्ज्ञप्तिसिद्धीश्वरत्वदायकाय नमः ।
ॐ कृष्णाष्टमीसमारब्धमासेनैकेनसाधिताय नमः । ४८०
ॐ मातृकया पुटीकृत्यमासेनैकेन साधिताय नमः ।
ॐ भूतलिप्या पुटीकृत्यमासेनैकेन साधिताय नमः ।
ॐ त्रिषष्ठ्यक्षरसंयुक्तमातृकापुटसिद्धिदाय नमः ।
ॐ कृष्णाष्टमीसमारब्धदिनसप्तकसिद्धिदाय नमः ।
ॐ अर्केन्दुग्रहकालीनजपाज्झटितिसिद्धिदाय नमः ।
ॐ निशात्रिकालपूजाकमासेनैकेनसिद्धिदाय नमः ।
ॐ मन्त्रार्णौषधिनिष्पन्नगुटिकाभिःसुसिद्धिदाय नमः ।
ॐ सूर्योदयसमारम्भदिनेनैकेनसाधिताय नमः ।
ॐ सहस्राराम्बुजारूढदेशिकस्मृतिसिद्धिदाय नमः ।
ॐ शिवोंहभावनासिद्धसर्वसिद्धिविलासकाय नमः । ४९०
ॐ पराकामकलाध्यानसिद्धीश्वरत्वदायकाय नमः ।
ॐ अकाराय नमः ।

ॐ अग्रियपूजाकाय नमः ।
ॐ अमृतानन्ददायकाय नमः ।
ॐ अनन्ताय नमः ।
ॐ अनन्तावतारेष्वनन्तफलदायकाय नमः ।
ॐ अष्टाङ्गपातसम्प्रीताय नमः ।
ॐ अष्टविधमैथुनप्रियाय नमः ।
ॐ अष्टपुष्पसमाराध्याय नमः ।
ॐ अष्टाध्यायीज्ञानदायकाय नमः । ५००
ॐ आरब्धकर्मनिर्विघ्नपूरयित्रे नमः ।
ॐ आक्षपाटिकाय नमः ।
ॐ इन्द्रगोपसमानश्रिये नमः ।
ॐ इक्षुभक्षणलालसाय नमः ।
ॐ ईकारवर्णसम्बुद्धपराकामकलात्मकाय नमः ।
ॐ ईशानपुत्राय नमः ।
ॐ ईशानाय नमः ।
ॐ ईषणात्रयमार्जकाय नमः ।
ॐ उद्दण्डाय नमः ।
ॐ उग्राय नमः । ५१०
ॐ उदग्राय नमः ।
ॐ उण्डेरकबलिप्रियाय नमः ।
ॐ ऊर्जस्वते नमः ।
ॐ ऊष्मलमदाय नमः ।
ॐ ऊहापोहदुरासदाय नमः ।
ॐ ऋजुचित्तैकसुलभाय नमः ।
ॐ ऋणत्रयविमोचकाय नमः ।
ॐ ऋगर्थवेत्रे नमः ।
ॐ ॠकाराय नमः ।
ॐ ॠकाराक्षररूपधृजे नमः । ५२०
ॐ ऌवर्णरूपाय नमः ।
ॐ ॡवर्णाय नमः ।
ॐ ॡकाराक्षरपूजिताय नमः ।
ॐ एधिताखिलभक्तश्रिये नमः ।

ॐ एधिताखिलसंश्रयाय नमः ।
ॐ एकाररूपाय नमः ।
ॐ ऐकाराय नमः ।
ॐ ऐम्पुटितस्मृतिबिन्दुकाय नमः ।
ॐ ओङ्कारवाच्याय नमः ।
ॐ ओङ्काराय नमः । ५३०
ॐ ओङ्काराक्षररूपधृजे नमः ।
ॐ औङ्काराढ्यगभूयुक्ताय नमः ।
ॐ औम्पूर्वयुग्गकारकाय नमः ।
ॐ अंशांशिभावसन्दृष्टाय नमः ।
ॐ अंशांशिभावविवर्जिताय नमः ।
ॐ अःकारान्तसमस्ताच्कवर्णमण्डलपूजिताय नमः ।
ॐ कतृतीयविसर्गाढ्याय नमः ।
ॐ कतृतीयार्णकेवलाय नमः ।
ॐ कर्पूरतिलकोद्भासिललाटोर्ध्वप्रदेशकाय नमः ।
ॐ खल्वाटभूमिसंरक्षिणे नमः । ५४०
ॐ खल्वाटबुद्धिभेषजाय नमः ।
ॐ खट्वाङ्गायुधसंयुक्ताय नमः ।
ॐ खड्गोद्यतकरान्विताय नमः ।
ॐ खण्डिताखिलदुर्भिक्षाय नमः ।
ॐ खनिलक्ष्मीप्रदर्शकाय नमः ।
ॐ खदिराधिकसाराढ्याय नमः ।
ॐ खलीकृतविपक्षकाय नमः ।
ॐ गान्धर्वविद्याचतुराय नमः ।
ॐ गन्धर्वनिकरप्रियाय नमः ।
ॐ घपूर्वबीजसन्निष्टाय नमः । ५५०
ॐ घोरघर्घरबृंहिताय नमः ।
ॐ घण्टानिनादसन्तुष्टाय नमः ।
ॐ घार्णाय नमः ।
ॐ घनागमप्रियाय नमः ।
ॐ चतुर्वेदेषु सङ्गीताय नमः ।
ॐ चतुर्थवेदनिष्ठिताय नमः ।

ॐ चतुर्दशकसंयुक्तचतुर्युक्तचतुश्शताय नमः ।
ॐ चतुर्थीपूजनप्रीताय नमः ।
ॐ चतुरात्मने नमः ।
ॐ चतुर्गतये नमः । ५६०
ॐ चतुर्थीतिथिसम्भूताय नमः ।
ॐ चतुर्वर्गफलप्रदाय नमः ।
ॐ छत्रिणे नमः ।
ॐ छद्मने नमः ।
ॐ छलाय नमः ।
ॐ छन्दोवपुषे नमः ।
ॐ छन्दोवतारकाय नमः ।
ॐ जगद्बन्धवे नमः ।
ॐ जगन्मात्रे नमः ।
ॐ जगद्रक्षिणे नमः । ५७०
ॐ जगन्मयाय नमः ।
ॐ जगद्योनये नमः ।
ॐ जगद्रूपाय नमः ।
ॐ जगदात्मने नमः ।
ॐ जगन्निधये नमः ।
ॐ जरामरणविध्वंसिने नमः ।
ॐ जगदानन्ददायकाय नमः ।
ॐ जागुडानुकृतिच्छायाय नमः ।
ॐ जाग्रदादिप्रकाशकाय नमः ।
ॐ जाम्बूनदसमच्छायाय नमः । ५८०
ॐ जपसम्प्रीतमानसाय नमः ।
ॐ जपयोगसुसंवेद्याय नमः ।
ॐ जपतत्परसिद्धिदाय नमः ।
ॐ जपाकुसुमसङ्काशाय नमः ।
ॐ जातीपूजकवाक्प्रदाय नमः ।
ॐ जयन्तीदिनसुप्रीताय नमः ।
ॐ जयन्तीपूजिताङ्घ्रिकाय नमः ।
ॐ जगद्धानतिरस्कारिणे नमः ।

ॐ जगद्भानतिरोहिताय नमः ।
ॐ जगद्रूपमहामायाधिष्ठानचिन्मयात्मकाय नमः । ५९०
ॐ झञ्झानिलसमश्वासिन नमः ।
ॐ झिल्लिकासमकान्तिकाय नमः ।
ॐ झलझ्झलासुसंशोभिशूर्पाकृतिद्विकर्णकाय नमः ।
ॐ टङ्ककर्मविनाभावस्वयम्भूतकलेवराय नमः ।
ॐ ठक्कुराय नमः ।
ॐ ठक्कुराराध्याय नमः ।
ॐ ठक्कुराकृतिशोभिताय नमः ।
ॐ डिण्डिमस्वनसंवादिने नमः ।
ॐ डमरुप्रियपुत्रकाय नमः ।
ॐ ढक्कावादनसन्तुष्टाय नमः । ६००
ॐ ढुण्ढिराजविनायकाय नमः ।
ॐ तुन्दिलाय नमः ।
ॐ तुन्दिलवपुषे नमः ।
ॐ तपनाय नमः ।
ॐ तापरोषघ्ने नमः ।
ॐ तारकब्रह्मसंस्थानाय नमः ।
ॐ तारानायकशेखराय नमः ।
ॐ तारुण्याढ्यवधूसङ्गिने नमः ।
ॐ तत्त्ववेत्रे नमः ।
ॐ त्रिकालविदे नमः । ६१०
ॐ स्थूलाय नमः ।
ॐ स्थूलकराय नमः ।
ॐ स्थेयाय नमः ।
ॐ स्थितिकर्त्रे नमः ।
ॐ स्थितिप्रदाय नमः ।
ॐ स्थाणवे नमः ।
ॐ स्थिराय नमः ।
ॐ स्थलेशायिने नमः ।
ॐ स्थाण्डिलकुलपूजिताय नमः ।
ॐ दुःखहन्त्रे नमः । ६२०

ॐ दुःखदायिने नमः ।
ॐ दुर्भिक्षादिविनाशकाय नमः ।
ॐ धनधान्यप्रदाय नमः ।
ॐ ध्येयाय नमः ।
ॐ ध्यानस्तिमितलोचनाय नमः ।
ॐ धीराय नमः ।
ॐ धिये नमः ।
ॐ धीरधिये नमः ।
ॐ धुर्याय नमः ।
ॐ धुरीणत्वप्रदायकाय नमः । ६३०
ॐ ध्यानयोगैकसन्दृष्टाय नमः ।
ॐ ध्यानयोगैकलम्पटाय नमः ।
ॐ नारायणप्रियाय नमः ।
ॐ नम्याय नमः ।
ॐ नरनारीजनाश्रयाय नमः ।
ॐ नग्नपूजनसन्तुष्टाय नमः ।
ॐ नग्ननीलासमावृताय नमः ।
ॐ निरञ्जनाय नमः ।
ॐ निराधाराय नमः ।
ॐ निर्लेपाय नमः । ६४०
ॐ निरवग्रहाय नमः ।
ॐ निशीथिनीनमस्याकाय नमः ।
ॐ निशीथिनीजपप्रियाय नमः ।
ॐ नामपारायणप्रीताय नमः ।
ॐ नामरूपप्रकाशकाय नमः ।
ॐ पुराणपुरुषाय नमः ।
ॐ प्रातस्सन्ध्यारुणवपुःप्रभाय नमः ।
ॐ फुल्लपुष्पसमूह श्रीसम्भूषितसुमस्तकाय नमः ।
ॐ फाल्गुनानुजपूजाकाय नमः ।
ॐ फेत्कारतन्त्रवर्णिताय नमः । ६५०
ॐ ब्राह्मणादिसमाराध्याय नमः ।
ॐ बालपूज्याय नमः ।

ॐ बलप्रदाय नमः ।
ॐ बाणार्चितपदद्वन्द्वाय नमः ।
ॐ बालकेलिकुतूहलाय नमः ।
ॐ भवानीहृदयानन्दिने नमः ।
ॐ भावगम्याय नमः ।
ॐ भवात्मजाय नमः ।
ॐ भवेशाय नमः ।
ॐ भव्यरूपाढ्याय नमः । ६६०
ॐ भार्गवेशाय नमः ।
ॐ भृगोःसुताय नमः ।
ॐ भव्याय नमः ।
ॐ भव्यकलायुक्ताय नमः ।
ॐ भावनावशतत्पराय नमः ।
ॐ भगवते नमः ।
ॐ भक्तिसुलभाय नमः ।
ॐ भयहन्त्रे नमः ।
ॐ भयप्रदाय नमः ।
ॐ मायाविने नमः । ६७०
ॐ मानदाय नमः ।
ॐ मानिने नमः ।
ॐ मनोभिमानशोधकाय नमः ।
ॐ महाहवोद्यतक्रीडाय नमः ।
ॐ मन्दहासमनोहराय नमः ।
ॐ मनस्विने नमः ।
ॐ मानविध्वंसिने नमः ।
ॐ मदलालसमानसाय नमः ।
ॐ यशस्विने नमः ।
ॐ यशाशंसिने नमः । ६८०
ॐ याज्ञिकाय नमः ।
ॐ याज्ञिकप्रियाय नमः ।
ॐ राजराजेश्वराय नमः ।
ॐ राज्ञे नमः ।

ॐ रामाय नमः ।
ॐ रमणलम्पटाय नमः ।
ॐ रसराजसमास्वादिने नमः ।
ॐ रसराजैकपूजिताय नमः ।
ॐ लक्ष्मीवते नमः ।
ॐ लक्ष्मसम्पन्नाय नमः । ६९०
ॐ लक्ष्याय नमः ।
ॐ लक्षणसंयुताय नमः ।
ॐ लक्ष्यलक्षणभावस्थाय नमः ।
ॐ लययोगविभाविताय नमः ।
ॐ वीरासनसमासीनाय नमः ।
ॐ वीरवन्द्याय नमः ।
ॐ वरेण्यदाय नमः ।
ॐ विविधार्थज्ञानदात्रे नमः ।
ॐ वेदवेदान्तवित्तमाय नमः ।
ॐ शिखिवाहसमारूढाय नमः । ७००
ॐ शिखिवाहननाथिताय नमः ।
ॐ श्रीविद्योपासनप्रीताय नमः ।
ॐ श्रीविद्यामन्त्रैविग्रहाय नमः ।
ॐ षडाधारक्रमप्रीताय नमः ।
ॐ षडाम्नायेषु संस्थिताय नमः ।
ॐ षड्दर्शनीपारदृश्वने नमः ।
ॐ षडध्वातीतरूपकाय नमः ।
ॐ षडूर्मिवृन्दविध्वंसिने नमः ।
ॐ षट्कोणमध्यबिन्दुगाय नमः ।
ॐ षट्त्रिंशत्तत्त्वसन्निष्ठाय नमः । ७१०
ॐ षट्कर्मसङ्घसिद्धिदाय नमः ।
ॐ षड्वैरिवर्गविध्वंसिविघ्नेश्वरगजाननाय नमः ।
ॐ सत्ताज्ञानादिरूपाढ्याय नमः ।
ॐ साहसाद्भुतखेलनाय नमः ।
ॐ सर्परूपधराय नमः ।
ॐ संविदे नमः ।

ॐ संसाराम्बुधितारकाय नमः ।
ॐ सर्पसङ्गसमाश्लिष्टाय नमः ।
ॐ सर्पकुण्डलितोदराय नमः ।
ॐ सप्तविंशतिऋक्पूज्याय नमः । ७२०
ॐ स्वाहायुङ्मन्त्रविग्रहाय नमः ।
ॐ सर्वकर्मसमारम्भसम्पूजितपदद्वयाय नमः ।
ॐ स्वयम्भुवे नमः ।
ॐ सत्यसङ्कल्पाय नमः ।
ॐ स्वयम्प्रकाशमूर्तिकाय नमः ।
ॐ स्वयन्भूलिङ्गसंस्थायिने नमः ।
ॐ स्वयम्भूलिङ्गपूजिताय नमः ।
ॐ हव्याय नमः ।
ॐ हुतप्रियाय नमः ।
ॐ होत्रे नमः । ७३०
ॐ हुतभुजे नमः ।
ॐ हवनप्रियाय नमः ।
ॐ हरलालनसन्तुष्टाय नमः ।
ॐ हलाहलाशिपुत्रकाय नमः ।
ॐ ह्रीङ्काररूपाय नमः ।
ॐ हुङ्काराय नमः ।
ॐ हाहाकारसमाकुलाय नमः ।
ॐ हिमाचलसुतासूनवे नमः ।
ॐ हेमभास्वरदेहकाय नमः ।
ॐ हिमाचलशिखारूढाय नमः । ७४०
ॐ हिमधामसमद्युतये नमः ।
ॐ क्षोभहन्त्रे नमः ।
ॐ क्षुधाहन्त्रे नमः ।
ॐ क्षैण्यहन्त्रे नमः ।
ॐ क्षमाप्रदाय नमः ।
ॐ क्षमाधारिणे नमः ।
ॐ क्षमायुक्ताय नमः ।
ॐ क्षपाकरनिभाय नमः ।

ॐ क्षमिणे नमः ।
ॐ ककारादिक्षकारान्तसर्वहल्कप्रपूजिताय नमः । ७५०
ॐ अकारादिक्षकारान्तवर्णमालाविजृम्भिताय नमः ।
ॐ अकारादिक्षकारान्तमहासरस्वतीमयाय नमः ।
ॐ स्थूलतमशरीराढ्याय नमः ।
ॐ कारुकर्मविजृम्भिताय नमः ।
ॐ स्थूलतरस्वरूपाढ्याय नमः ।
ॐ चक्रजालप्रकाशिताय नमः ।
ॐ स्थूलरूपसमुज्जृम्भिणे नमः ।
ॐ हृदब्जध्यातरूपकाय नमः ।
ॐ सूक्ष्मरूपसमुल्लासिने नमः ।
ॐ मन्त्रजालस्वरूपकाय नमः । ७६०
ॐ सूक्ष्मतरतनुश्रीकाय नमः ।
ॐ कुण्डलिनीस्वरूपकाय नमः ।
ॐ सुक्ष्मतमवपुश्शोभिने नमः ।
ॐ पराकामकलातनवे नमः ।
ॐ पररूपसमुद्भासिने नमः ।
ॐ सच्चिदानन्दविग्रहाय नमः ।
ॐ परापरवपुर्धारिणे नमः ।
ॐ सप्तरूपविलासिताय नमः ।
ॐ षडाम्नायमहामन्त्रनिकुरुम्बनिषेविताय नमः ।
ॐ तत्पुरुषमुखोत्पन्नपूर्वाम्नायमनुप्रियाय नमः । ७७०
ॐ अघोरमुखसञ्जातदक्षिणाम्नायपूजिताय नमः ।
ॐ सद्योजातमुखोत्पन्नपश्चिमाम्नायसेविताय नमः ।
ॐ वामदेवमुखोत्पन्नोत्तराम्नायप्रपूजिताय नमः ।
ॐ ईशानमुखसञ्जातोर्ध्वाम्नायमनुसेविताय नमः ।
ॐ विमर्शमुखसञ्जातानुत्तराम्नायपूजिताय नमः ।
ॐ तोटकाचार्यसन्दिष्टपूर्वाम्नायकमन्त्रकाय नमः ।
ॐ सुरेशसमुपादिष्टदक्षिणाम्नायमन्त्रकाय नमः ।
ॐ पद्मपादसमादिष्टपश्चिमाम्नायमन्त्रकाय नमः ।
ॐ हस्तामलकसन्दिष्टोत्तराम्नायकमन्त्रकाय नमः ।
ॐ शङ्कराचार्यसन्दिष्टोर्ध्वाम्नायाखिलमन्त्रकाय नमः । ७८०

ॐ दक्षिणामूर्तिसन्दिष्टनुत्तराम्नायमन्त्रकाय नमः ।
ॐ सहजानन्दसन्दिष्टानुत्तराम्नायमन्त्रकाय नमः ।
ॐ पूर्वाम्नायकमन्त्रौघैःसृष्टिशक्तिप्रकाशकाय नमः ।
ॐ दक्षिणाम्नायमन्त्रौघैःस्थितिशक्तिप्रकाशकाय नमः ।
ॐ पश्चिमाम्नायमन्त्रौघैर्हृतिशक्तिप्रकाशकाय नमः ।
ॐ उत्तराम्नायमन्त्रौघैस्तिरोधानप्रकाशकाय नमः ।
ॐ ऊर्ध्वाम्नायकमन्त्रौघैरनुग्रहप्रकाशकाय नमः ।
ॐ अनुत्तरगमन्त्रौघैःसहजानन्दलासकाय नमः ।
ॐ सर्वाम्नायकसन्दिष्टानुस्यूतचित्सुखात्मकाय नमः ।
ॐ सृष्टिकर्त्रे नमः । ७९०
ॐ ब्रह्मरूपाय नमः ।
ॐ गोप्त्रे नमः ।
ॐ गोविन्दरूपकाय नमः ।
ॐ संहारकृते नमः ।
ॐ रुद्ररूपाय नमः ।
ॐ तिरोधायकाय नमः ।
ॐ ईश्वराय नमः ।
ॐ सदाशिवाय नमः ।
ॐ अनुग्रहीत्रे नमः ।
ॐ पञ्चकृत्यपरायणाय नमः । ८००
ॐ अणिमादिगुणास्पृष्टाय नमः ।
ॐ निर्गुणानन्दरूपकाय नमः ।
ॐ सर्वात्मभावनारूपाय नमः ।
ॐ सुखमात्रानुभावकाय नमः ।
ॐ स्वस्वरूपसुसंशोभिने नमः ।
ॐ ताटस्थिकस्वरूपकाय नमः ।
ॐ षड्गुणाय नमः ।
ॐ अखिलकल्याणगुणराजिविराजिताय नमः ।
ॐ यज्ञाग्निकुण्डसम्भूताय नमः ।
ॐ क्षीरसागरमध्यगाय नमः । ८१०
ॐ त्रिदशकारुनिष्पन्नस्वानन्दभवनस्थिताय नमः ।
ॐ ऊरीकृतेशपुत्रत्वाय नमः ।

ॐ नीलवाणीविवाहिताय नमः ।
ॐ नीलसरस्वतीमन्त्रजपतात्पर्यसिद्धिदाय नमः ।
ॐ विद्यावदसुरध्वंसिने नमः ।
ॐ सुररक्षासमुद्यताय नमः ।
ॐ चिन्तामणिक्षेत्रवासिने नमः ।
ॐ चिन्तिताखिलपूरकाय नमः ।
ॐ महापापौघविध्वंसिने नमः ।
ॐ देवेन्द्रकृतपूजनाय नमः । ८२०
ॐ ताराम्भिणे नमः ।
ॐ नमोयुक्ताय नमः ।
ॐ भगवत्पदङेन्तगाय नमः ।
ॐ एकदंष्ट्रायसंयुक्ताय नमः ।
ॐ हस्तिमुखायसंयुताय नमः ।
ॐ लम्बोदरचतुर्थ्यन्तविराजितकलेवराय नमः ।
ॐ उच्छिष्टपदसंराजिने नमः ।
ॐ महात्मनेपदप्रियाय नमः ।
ॐ आङ्क्रोंह्रीङ्गंसमायुक्ताय नमः ।
ॐ घेघेस्वाहासमापिताय नमः । ८३०
ॐ ताराब्धमहामन्त्राय नमः ।
ॐ हस्तिमुखान्तङेयुताय नमः ।
ॐ लम्बोदरायसंयुक्ताय नमः ।
ॐ ङेन्तोच्छिष्टमहात्मयुजे नमः ।
ॐ पाशाङ्कुशत्रपामाराय नमः ।
ॐ हृल्लेखासमलङ्कृताय नमः ।
ॐ वर्मघेघेसमारूढाय नमः ।
ॐ उच्छिष्टायपदोपधाय नमः ।
ॐ वह्निजायासुसम्पूर्णाय नमः ।
ॐ मन्त्रराजद्वयान्विताय नमः । ८४०
ॐ हेरम्बाख्यगणेशानाय नमः ।
ॐ लक्ष्मीयुतगजाननाय नमः ।
ॐ तारुण्येशाय नमः ।
ॐ बालरूपिणे नमः ।

ॐ शक्तीशाय नमः ।
ॐ वीरनामकाय नमः ।
ॐ ऊर्ध्वसमाख्याय नमः ।
ॐ उच्छिष्टाय नमः ।
ॐ विजयाय नमः ।
ॐ नृत्यकर्मकाय नमः । ८५०
ॐ विघ्नविध्वंसिविघ्नेशाय नमः ।
ॐ द्विजपूर्वगणाधिपाय नमः ।
ॐ क्षिप्रेशाय नमः ।
ॐ वल्लभाजानये नमः ।
ॐ भक्तीशाय नमः ।
ॐ सिद्धिनायकाय नमः ।
ॐ द्यष्टावतारसम्भिन्नलीलावैविध्यशोभिताय नमः ।
ॐ द्वात्रिंशदवताराढ्याय नमः ।
ॐ द्वात्रिंशद्दीक्षणक्रमाय नमः ।
ॐ शुद्धविद्यासमारब्धमहाषोडशिकान्तिमाय नमः । ८६०
ॐ महत्पदसमायुक्तपादुकासम्प्रतिष्ठिताय नमः ।
ॐ प्रणवाद्ये नमः ।
ॐ त्रितारीयुजे नमः ।
ॐ बालाबीजकशोभिताय नमः ।
ॐ वाणीभूबीजसंयुक्ताय नमः ।
ॐ हंसत्रयसमन्विताय नमः ।
ॐ खेचरीबीजसम्भिन्नाय नमः ।
ॐ नवनाथसुशोभिताय नमः ।
ॐ प्रासादश्रीसमायुक्ताय नमः ।
ॐ नवनाथविलोमकाय नमः । ८७०
ॐ पराप्रासादबीजाढ्याय नमः ।
ॐ महागणेशमन्त्रकाय नमः ।
ॐ बालाक्रमोत्क्रमप्रीताय नमः ।
ॐ योगबालाविजृम्भिताय नमः ।
ॐ अन्नपूर्णासमायुक्ताय नमः ।
ॐ वाजिवाहाविलासिताय नमः ।

ॐ सौभाग्यपूर्वविद्यायुजे नमः ।
ॐ रमादिषोडशीयुताय नमः ।
ॐ उच्छिष्टपूर्वचाण्डालीसमायुक्तसुविग्रहाय नमः ।
ॐ त्रयोदशार्णवाग्देवीसमुल्लसितमूर्तिकाय नमः । ८८०
ॐ नकुलीमातृसंयुक्ताय नमः ।
ॐ महामातङ्गिनीयुताय नमः ।
ॐ लघुवार्तालिकायुक्ताय नमः ।
ॐ स्वप्नवार्तालिकान्विताय नमः ।
ॐ तिरस्कारीसमायुक्ताय नमः ।
ॐ महावार्तालिकायुक्ताय नमः ।
ॐ पराबीजसमायुक्ताय नमः ।
ॐ लोपामुद्राविजृम्भिताय नमः ।
ॐ त्रयोदशाक्षरीहादिज्ञप्तिविद्यासमन्विताय नमः ।
ॐ महावाक्यमहामातृचतुष्टयविलासिताय नमः । ८९०
ॐ ब्रह्मण्यरसबीजाढ्यब्रह्मण्यद्वयशोभिताय नमः ।
ॐ सप्तदशाक्षरीशैवतत्त्वविमर्शिनीयुताय नमः ।
ॐ चतुर्विंशतिवर्णात्मदक्षिणामूर्तिशोभिताय नमः ।
ॐ रदनाक्षरसंशोभिगणपोच्छिष्टमन्त्रकाय नमः ।
ॐ गिरिव्याहृतिवर्णात्मगणपोच्छिष्टराजकाय नमः ।
ॐ हंसत्रयसमारूढाय नमः ।
ॐ रसावाणीसमर्पिताय नमः ।
ॐ श्रीविद्यानन्दनाथाढ्याय नमः ।
ॐ आत्मकपदसंयुताय नमः ।
ॐ श्रीचर्यानन्दनाथाढ्याय नमः । ९००
ॐ श्रीमहापादुकाश्रिताय नमः ।
ॐ पूजयामिपदप्रीताय नमः ।
ॐ नमःपदसमापिताय नमः ।
ॐ गुरुमुखैकसंवेद्याय नमः ।
ॐ गुरुमण्डलपूजिताय नमः ।
ॐ दीक्षागुरुसमारब्धशिवान्तगुरुसेविताय नमः ।
ॐ गुरुभिःकुलरूपिभिःसमाराध्यपदद्वन्द्वाय नमः ।
ॐ विद्यावतारगुरुभिःसम्पूजितपदद्वयाय नमः ।

ॐ परौघीयगुरुप्रीताय नमः ।
ॐ दिव्यौघगुरुपूजिताय नमः । ९१०
ॐ सिद्धौघदेशिकाराध्याय नमः ।
ॐ मानवौघनिषेविताय नमः ।
ॐ गुरुत्रयसमाराध्याय नमः ।
ॐ गुरुषट्कप्रपूजिताय नमः ।
ॐ शाम्भवीक्रमसम्पूज्याय नमः ।
ॐ अशीत्युत्तरशतार्चिताय नमः ।
ॐ क्षित्यादिरश्मिसन्निष्ठाय नमः ।
ॐ लङ्घिताखिलरश्मिकाय नमः ।
ॐ षडन्वयक्रमाराध्याय नमः ।
ॐ देशिकान्वयरक्षिताय नमः । ९२०
ॐ सर्वश्रुतिशिरोनिष्ठपादुकाद्वयवैभवाय नमः ।
ॐ पराकामकलारूपाय नमः ।
ॐ शिवोहम्भावनात्मकाय नमः ।
ॐ चिच्छक्त्यारव्यपराहंयुजे नमः ।
ॐ सर्वज्ञानिस्वरूपकाय नमः ।
ॐ संविद्बिन्दुसमारव्याताय नमः ।
ॐ अपराकामकलामयाय नमः ।
ॐ मायाविशिष्टसर्वेशाय नमः ।
ॐ महाबिन्दुस्वरूपकाय नमः ।
ॐ अणिमादिगुणोपताय नमः । ९३०
ॐ सर्जनादिक्रियान्विताय नमः ।
ॐ मायाविशिष्टचैतन्याय नमः ।
ॐ अगण्यरूपविलासकाय नमः ।
ॐ मिश्रकामकलारूपाय नमः ।
ॐ अग्नीषोमीयस्वरूपकाय नमः ।
ॐ मिश्रबिन्दुसमारव्याकाय नमः ।
ॐ जीववृन्दसमाश्रिताय नमः ।
ॐ कामकलात्रयाविष्टाय नमः ।
ॐ बिन्दुत्रयविलासिताय नमः ।
ॐ कामकलात्रयध्यानसर्वबन्धविमोचकाय नमः । ९४०

ॐ बिन्दुत्रयैकताध्यानविकलेवरमुक्तिदाय नमः ।
ॐ महायजनसम्प्रीताय नमः ।
ॐ वीरचर्याधरप्रियाय नमः ।
ॐ अन्तर्यागक्रमाराध्याय नमः ।
ॐ बहिर्यागपुरस्कृताय नमः ।
ॐ आत्मयागसमाराध्याय नमः ।
ॐ सर्वविश्वनियामकाय नमः ।
ॐ मातृकादशकन्यासदेवताभावसिद्धिदाय नमः ।
ॐ प्रपञ्चयागन्यासेनसर्वैश्वरत्वदायकाय नमः ।
ॐ लघुषोढामहाषोढान्यासद्वयसमर्चिताय नमः । ९५०
ॐ श्रीचक्रत्रिविधन्यासमहासिद्धिविधायकाय नमः ।
ॐ रश्मिमालामहान्यासवज्रवर्मस्वरूपकाय नमः ।
ॐ हंसपरमहंसाख्यन्यासद्वयविभाविताय नमः ।
ॐ महापदावनीन्यासकलाशताधिकाष्टकाय नमः ।
ॐ त्रिपुरापूजनप्रीताय नमः ।
ॐ त्रिपुरापूजकप्रियाय नमः ।
ॐ नवावृतिमहायज्ञसंरक्षणधुरन्धराय नमः ।
ॐ लम्बोदरमहारूपाय नमः ।
ॐ भैरवीभैरवात्मकाय नमः ।
ॐ उत्कृष्टशिष्टसद्वस्तुने नमः । ९६०
ॐ परसंवित्तिरूपकाय नमः ।
ॐ शुभाशुभकराय कर्मणे नमः ।
ॐ जीवयात्राविधायकाय नमः ।
ॐ सते नमः ।
ॐ चिते नमः ।
ॐ सुखाय नमः ।
ॐ नाम्ने नमः ।
ॐ रूपाय नमः ।
ॐ अधिष्ठानात्मकाय नमः ।
ॐ पराय (परस्मै) नमः । ९७०
ॐ आरोपितजगज्जाताय नमः ।
ॐ मिथ्याज्ञानाय नमः ।

ॐ अमङ्गलाय नमः ।
ॐ अकारादिक्षकारान्ताय नमः ।
ॐ शब्दसृष्टिस्वरूपाय नमः ।
ॐ परायै वाचे नमः ।
ॐ विमर्शरूपिणे नमः ।
ॐ पश्यन्त्यै नमः ।
ॐ स्फोटरूपधृते नमः ।
ॐ मध्यमायै नमः । ९८०
ॐ चिन्तनारूपाय नमः ।
ॐ वैखर्यै नमः ।
ॐ स्थूलवाचकाय नमः ।
ॐ ध्वनिरूपाय नमः ।
ॐ वर्णरूपिणे नमः ।
ॐ सर्वभाषात्मकाय नमः ।
ॐ अपराय (अपरस्मै) नमः ।
ॐ मूलाधारगताय नमः ।
ॐ सुप्ताय नमः ।
ॐ स्वाधिष्ठाने प्रपूजिताय नमः । ९९०
ॐ मणिपूरकमध्यस्थाय नमः ।
ॐ अनाहताम्बुजमध्यगाय नमः ।
ॐ विशुद्धिपङ्कजोल्लासाय नमः ।
ॐ आज्ञाचक्राब्जवासकाय नमः ।
ॐ सहस्राराम्बुजारूढाय नमः ।
ॐ शिवशक्त्यैक्यरूपकाय नमः ।
ॐ मूलकुण्डलिनीरूपाय नमः ।
ॐ महाकुण्डलिनीमयाय नमः ।
ॐ षोडशान्तमहास्थानाय नमः ।
ॐ अस्पर्शाभिधमहास्थित्यै नमः । १०००

इति उड्डामरेश्वरतन्त्रे क्षिप्रप्रसादनपटले
गुह्यनाम उच्छिष्टगणेशसहस्रनामावलिः सम्पूर्णा ।

The text is not a conventional one and is supportive of higher level established Tantric practices. It is not meant for commonly devotional chanting. User dicretion is recommended.

Proofread by krishna vallapareddy krishna321 at hotmail.com

*shrIguhyanAmauchChiShTagaNeshAnasahasranAmAvaliH*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*